शुभेषु कार्य्येष्वशुभाय शान्तौ
दीप्तौ भयादौ भयनाशनाय ।
विपर्य्यये द्वावपि न प्रशस्ता-
वस्तित्वनास्तित्वफलौ यतस्तौ ॥"
इति वसन्तराजशाकुने स्वरप्रकरणम् ॥

**स्वरपत्तनं**, क्ली, ( स्वराणां षड्जादीनां पत्तनमाश्रयस्थानम् । ) सामवेदः । इति त्रिकाण्डशेषः ॥

**स्वरभङ्गः**, पुं, ( स्वरस्य भङ्गो यस्मात् । ) गलरोगविशेषः । अस्य विवरणं स्वरभेदशब्दे द्रष्टव्यम् ॥

**स्वरभङ्गी**, [ न् ] पुं, ( स्वरस्य भङ्गोऽस्यास्तीति । इनिः । ) पक्षिविशेषः । यथा,—
"स्वरभङ्गी नवौ हङ्चुविरुट्शकुनभेदकाः ॥"
इति शब्दचन्द्रिका ॥

**स्वरभेदः**, पुं, ( स्वरस्य भेदो यस्मात् । ) स्वरभङ्गरोगः । यथा । अथ स्वरभेदाधिकारः । तत्र स्वरभेदस्य निदानसम्प्राप्तिपूर्ब्बकं लक्षणमाह ।
"अत्युच्चभाषणविषाध्ययनाभिघातैः
सन्दूषणैः प्रकुपिताः पवनादयस्तु ।
स्रोतःसु ते स्वरवहेषु मताः प्रतिष्ठां
हन्युः स्वरं भवति चापि हि षड्विधः सः ॥"
अध्ययनमुच्चैर्व्वेदादिपाठः । अभिघातः कण्ठादिदेशे लगुड़ादिभिः । एतैरत्युच्चभाषणादिभिश्चतुर्भिः संदूषणैरन्यैरपि । निजैर्दुष्टहेतुभिः । स्रोतःसु स्वरवहेषु चतुर्षु । प्रतिष्ठाम् स्थितिम् । हन्युः स्वरमिति लक्षणम् । स्वरभेदः षड्विधः । वातपित्तकफसन्निपातक्षयमेदोभवभेदैः ॥*॥ तत्र वातिकस्वरभेदिनो लक्षणमाह ।
"वातेन कृष्णनयनाननमूत्रवर्च्चा
भिन्नं शनैर्वदति गर्द्दभवत् स्वरञ्च ।"*।
पित्तेनाह ।
"पित्तेन पीतनयनाननमूत्रवर्च्चा
ब्रूयाद्गलेन स च दाहसमन्वितेन ॥"
गलदाहोऽत्र वचनसमय एव बोद्धव्यः ॥*॥
कफेनाह ।
"ब्रूयात् कफेन सततं कफरुद्धकण्ठः ।
स्वल्पं शनैर्व्वदति चापि दिवाविशेषात् ॥"
दिवा सूर्य्यरश्मिभिः कफस्याल्पीभावात् ॥*॥
सन्निपातेनाह ।
"सर्व्वात्मके भवति सर्व्वविकारसम्प-
त्तच्चाप्यसाध्यमृषयः स्वरभेदमाहुः ॥"*॥
क्षयजमाह ।
"धूप्येत वाक्क्षयकृति क्षयमाप्नुयाच्च
वागेषु चापि हतवाक् परिवर्ज्जनीयः ॥"
वाक् धूप्येत सधूमेव निःसरति क्षयञ्चाप्नुयात् वागेव ॥ * ॥ मेदोभवमाह ।
"अन्तर्गतं स्वरमलक्ष्यपदं चिरेण
मेदोऽन्वयाद्वदति दिग्धगलस्तृषार्त्तः ॥"
अन्तर्गतं गलमध्य एव स्वरं वदति । दिग्धगलः मेदसा श्लेष्मणावलिप्तगलः । तृषार्त्तः मेदसोऽम्मार्गावरोधात् ॥ * ॥ असाध्यमाह ।
"क्षीणस्य वृद्धस्य कृशस्य चापि
चिरोत्थितो यश्च सहोपजातः ।
मेदस्विनः सर्व्वसमुद्भवश्च
स्वरामयो यो न स सिद्धिमेति ॥"
क्षीणस्य क्षयरोगिणः । कृशस्य अपुष्टस्य ॥*॥
अथ स्वरभेदस्य चिकित्सा ।
"वातादिजनितश्वासकासघ्ना ये प्रकीर्त्तिताः ।
योगास्तानत्र युञ्जीत यथादोषं चिकित्सकः ॥
वाते सलवणं तैलं पित्ते सर्पिः समाक्षिकम् ।
कफे सक्षारकटुकक्षौद्रः कवल इष्यते ॥
गले तालुनि जिह्वायां दन्तमूलेषु चाश्रितः ।
तेन निष्कृष्यते श्लेष्मा स्वरश्चाशु प्रसीदति ॥
खादेत् कोष्णं जलं पेयं भुक्त्वा घृतगुड़ौदनम् ।
क्षीरानुपानं पित्तोत्थे पिबेत् सर्पिरतन्द्रितः ।
पिप्पलीं पिप्पलीमूलं मरिचं विश्वभेषजम् ।
पिबेन्मूत्रेण मतिमान् कफजे स्वरसंक्षये ॥
निदिग्धिका तुला ग्राह्या तदर्द्धं ग्रन्थिकस्य तु ।
तदर्द्धं चित्रकस्यापि दशमूलञ्च तत्समम् ॥
जलद्रोणद्वये क्वाथ्यं ग्राह्योयादाढ़कं ततः ।
पूते पिबेत्तदर्द्धन्तु पुराणस्य गुड़स्य च ॥
सर्व्वमेकत्र कृत्वा तु लेहवत् साधु साधयेत् ।
अष्टौ पलानि पिप्पल्यास्त्रिजातकपलं तथा ॥
मरिचस्य पलं चैकं सर्व्वमेकत्र चूर्णितम् ।
मधुनः कुड़वं दत्त्वा तदश्नीयाद्‌ययानलम् ॥
निदिग्धिकावलेहोऽयं भिषग्भिर्मुनिभिर्म्मतः ।
स्वरभेदहरो मुख्यः प्रतिश्यायहरस्तथा ॥
कासश्वासाग्निमान्द्यादीन् गुल्ममेहगलामयान् ।
आनाहं मूत्रकृच्छ्राणि हन्यादश्मर्य्यर्ब्बुदानि
च ॥"
इति निदिग्धिकावलेहः ॥*॥
"मृगनाभिः सुसूक्ष्मैलालवङ्गकुसुमान्वितैः ।
त्वक्क्षीरी चेति लेहोऽयं सर्पिर्मधुसमायुतः ॥
ब्राह्मी वचाभया वासा पिप्पली मधुसंयुता ।
अस्य प्रयोगात् सप्ताहात् किन्नरैः सह
गायति ॥"
इति स्वरभेदाधिकारः ॥ इति भावप्रकाशः ॥*॥
अन्यच्च ।
"विभीतकस्य वै चूर्णं पिप्पलीसैन्धवस्य च ।
पीतं सकाञ्जिकं हन्ति स्वरभेदं महेश्वर ॥"
इति गारुड़े । १९४ । २८ ॥
( तथास्य चिकित्सान्तरं यथा,—
"भृङ्गराजामृतावल्ली वासकदशमूलकासमर्द्द-
रसैः ।
सर्पिः सपिप्पलीकं सिद्धं स्वरभेदकासजिच्च-
ह्नुना ॥"
इति भृङ्गराजाद्यं घृतम् ॥
इति वैद्यकचक्रपाणि संग्रहे स्वरभेदाधिकारे ॥
तथात्र पथ्यापथ्यनियमो यथा,—
"स्वेदो वस्तिर्धूमपानं विरेकः कवलग्रहः ।
नस्यं भाले सिरावेधो यवा लोहितशालयः ॥
हंसाटवीताम्रचूड़केकिमांसरसाः सुरा ।
गोकण्टकः काकमाची जीवन्ती बालमूलकम् ।
द्राक्षा पथ्या मातुलुङ्गं लशुनं लवणार्द्रकम् ।
ताम्बूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनाम् ॥"
अपथ्यानि यथा,—
"आमं कपित्थं बकुलं शालूकं जम्बवानि च ।
तिन्दूकानि कषायाणि वमिं स्वप्नं प्रजल्पनम् ॥
अनुपानञ्च यत्नेन स्वरभेदी विवर्ज्जयेत् ॥"
इति वैद्यकपथ्यापथ्यविधिः ॥ )

**स्वरमण्डलिका**, स्त्री, (स्वराणां मण्डलमस्त्यत्रेति । स्वरमण्डल + ठन् । ) वीणाविशेषः । इति शब्दरत्नावली । क्वचित् पुस्तके सुरमण्डलिका इति पाठः ॥

**स्वरलासिका**, स्त्री, (स्वरैर्लसतीति । लस + ण्वुल् । टापि अत इत्वम् ।) वंशी । इति शब्दरत्नावली ॥

**स्वरसः**, पुं, (स्वस्य रसः । स्व आत्मीयो रसो वा ।) शिलापिष्टकल्कः । यथा,—
"स्वो रसः स्वरसः प्रोक्तः कल्को दृषदि
पेषितः ॥"
इति शब्दचन्द्रिका ॥ * ॥
कषायविशेषः । यथा,—
"सद्यः क्षुण्णादार्द्रद्रव्याद्वस्त्रयन्त्रादिपीड़नात् ।
यो रसस्त्वभिनिर्यातिं स्वरसः सः प्रकीर्त्तितः ॥"
इति वैद्यकम् ॥
अन्यच्च ।
"पिष्टः कल्को विनीयश्च स्वरसः पीड़ितो रसः ।
क्वाथः कषायो निर्यूहो निर्यासो वेष्ठकस्तथा ॥"
इति रत्नमाला ॥
("यन्त्रप्रपीड़नाद्द्रव्याद्रसः स्वरस उच्यते ॥"
इति चरके सूत्रस्थाने चतुर्थेऽध्याये ॥
"शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे ।
वारिण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे स्वरभेदाधिकारे ॥)

**स्वरा**, स्त्री, ब्रह्मणो ज्येष्ठपत्नी । गायत्रीसपत्नी । यथा,—
"चाक्षुषस्यान्तरे पूर्ब्बं मनोर्देवः पितामहः ।
सह्याद्रिशिखरे रम्ये यजनायोद्यतोऽभवत् ॥
स कृत्वा यज्ञसम्भारान् सर्व्वदेवगणैर्वृतः ।
युक्तो हरिहराभ्यां हि तद्गिरेः शिखरं ययौ ॥
भृग्वादयो मुनिगणा मुहूर्त्ते ब्रह्मदैवते ।
तस्य दीक्षाविधानाय समाजं चक्रुराहृताः ॥
अथ ज्येष्ठां स्वरां पत्नीमाह्वयाञ्चक्रुरीश्वराः ।
सा शनैराययौ तावत् भृगुर्व्विष्णुमुवाच ह ॥*॥
भृगुरुवाच ।
विष्णो स्वरा त्वयाहूता साप्यायाति नहि
त्वरम् ।
मुहूर्त्तातिक्रमे चैव कार्य्यो दीक्षाविधिः कथम् ॥
विष्णुरुवाच ।
नायाति चेत् स्वरा शीघ्रं गायत्र्यत्र विधी-
यताम् ।
एषापि न भवेदस्य भार्य्या किं पुण्यकर्म्मणि ॥
नारद उवाच ।
एवमेव हि रुद्रोऽपि विष्णुवाक्यममन्यत ।
तच्छ्रुत्वा स भृगुर्व्वाक्यं गायत्रीं ब्रह्मणस्तदा ।